Research Paper Sanskrit

# आधुनिकविज्ञानस्य उत्सः : संस्कृतसाहित्यम्
# (aadhunik vignansya utash: sanskritsahityam)

मधुमिता जाना

अतिथि अध्यापिका संस्कृतविभागः विवेकानन्दमिशनमहाविद्यालयः चैतन्यपुरम् (हलदिया), पूर्वमेदिनीपूरम्प श्चिमवङ्गः

**ABSTRACT**

सभ्यतायाः प्राचीनकालेऽपि विज्ञानस्य अवदानं सर्वत्र दृश्यन्ते । प्राचीनभारतेऽपि विज्ञानस्य प्रभावः अपरिसीमः । रामायणे चरूः पानं कृत्वा दशरथस्य सहधर्मिण्यः अन्तःसत्वाः अभवन् । एतद् गर्भसञ्चारस्य भेषजमासीत् । रामचन्द्रः ब्रह्मास्त्रं प्रयोगं कृत्वा समुद्रं वन्धनं कृतवान् । एष ब्रह्मात्रम् आधुनिकविज्ञानसम्मतं भवति । अपि च रामायणे विमानस्य दृष्टान्तः परिलक्षते । एतद् विमानं विज्ञानसम्मतं भवति । महाभारते विज्ञानस्य अजस्रम् अवदानं दृश्यन्ते । महाभारतस्य घटनाविश्लेषणे ज्ञायते विदुरस्य पुत्रः सञ्जयः दृष्टिहीणधृतराष्ट्रस्य गृहं स्थित्वा कुरुक्षेत्ररणस्य युद्धविवरणीं श्रावयामास । एषा घटना वर्तमानकाले नेटओयार्क इत्यस्य सादृश्यं लभते । श्रीमद्भागवतग्रन्थात् ज्ञायते श्रीकृष्णः नरकासुरं वधं कर्तु द्वारका इति स्थानादेव प्रग्ज्योतिषपुरं गतवान् । नरकासुरोऽपि विमानम् आरुह्य तमेव आक्रमणं कृतवान् । नारकासुरः मृत्तिकास्थलात् चतुःसहस्रफुटं उच्चैः अवस्थानं कृतवान् । श्रीकृष्णः अस्त्रं निक्षिप्य तद्विमानं निम्नस्थानम् आनयत् । श्रीकृष्णस्य एतद् दिव्यास्त्रं विज्ञानसम्मतमासीत् । प्राचीने भारतवर्षे विमानयानम्, ब्रह्मास्त्रप्रयोगम्, वाणप्रयोगम्, दिव्यदिष्ट्या सर्वविधदर्शनम्, चरुपानम् - प्रभीतीनि दृष्टान्तानि परिकीर्तन्ते ।

**KEYWORDS**

संस्कृतसाहित्यम्, विज्ञानम्, रामायणम्, महाभारतम्, श्रीमद्भागवतम्।

पृथिव्याम् आदौ आदिममनुष्यः तेषाम् अस्तित्वरक्षार्थम् आहार्यानुसन्ध्यानं कृतवन्तः । तस्मात् परं विवर्तणं साधितः । विज्ञानपक्रियया प्रकृत्या वस्तुसम्भारं स्वेषाम् आवश्यकीयद्रव्याणि संरक्षणाय विज्ञानप्रयुक्त्या प्रभवः । अतः विज्ञानं भवति सर्वाधुनिकः युक्तितर्कयोः समन्वितं फ़लम् । इदम् अस्माकं सर्वविधवस्तूनि विचारार्थं शिक्षादाणं करोति । वैज्ञानिकाः अनुदिनम् अतन्त्रसाधनया युक्तिवादं भित्तिं कृत्वा नवनवायमानाविष्कारेषु रताः भवन्ति । निःसर्गप्रकृत्याः रहस्यरोमाञ्चञ्च मानवानां कौतूहलीकर्तुम् उत्साहशीलाः भवन्ति । तेऽपि विस्मिता, रोमाञ्चिताश्च भवन्ति भूयो भूयः । तस्मादेव विज्ञानपथपरिक्रमा भवति । मनुष्याः प्रतिदिनं विज्ञानं उपलब्धिं कुर्वन्ति । प्रायशः विज्ञानपन्थानम् अनुसन्धानं कुर्वन्ति । विरूपां प्रकृतिं वशीकर्तुं चिन्तयन्ति । क्रमशः मानवसभ्यता मार्गशीर्षं प्राप्नोति । तीक्ष्णास्त्रान् निर्माणं कृत्वा वन्यपशुवर्गम् अनायासेन निधनं कर्तुं चेष्टन्ते । अस्मानि संगृह्य अग्निं प्रज्वलयितुं , विभिन्नधातूनां व्यवहारं कर्तुं, कृषिकर्माणि प्रभृतयः विज्ञानप्रक्रिया भवन्ति । विज्ञानं गवेषणागारमध्ये न स्थितं सर्वदा गवेषणायाः निरन्तरं अग्रगतिः जायते । अतः विज्ञानं धरण्याः अनन्तरूपं विस्मायावहं भवति । विज्ञानेन मानवाः नवजीवनं लब्धुं प्रयोगं कर्तुं च, अग्रगतिञ्च त्वरान्वितकर्तुं नियतं चेष्टन्ते । जीवनधारणपक्रियया नवनवोपकरणानि सदा सृजणं कुर्वन्ति । सभ्यतायाः प्राचीनकालेऽपि विज्ञानस्य अवदानं सर्वत्रं रक्षितम् । प्राचीनभारतेऽपि विज्ञानस्य प्रभावः अपरिसीमः ।

एरिक फ़न दानिकेन नाम्ना जनैक सुइस् भद्रमहोदयस्तस्य प्रख्यातपुस्तके "च्यारियट्स् अफ़् गड् " ग्रन्थे उवाच - देवा अपि स्वयम्भूसदृशाः न भवन्ति । ते भवन्ति अन्यस्तरीभूताः मानवाः । युगेषु युगेषु च विभिन्नावतारूपेण ते आगच्छन्ति । तेऽपि मनुष्यान् उन्नतान् कर्तुं सभ्यतायाः ज्ञानं वितरणं कर्तुं चेष्टन्ते स्म । तेषां सहायतया मनुष्याः सभ्यताविकाशकर्तुं चेष्टन्ते । सभ्यतायाः इतिहासं विश्लेषणं कर्तुं, समस्यासङ्कुलं विभिन्नपरिवेशं जेतुम्, उन्नततमविवर्तणस्य सोपानम् आरूढं कर्तुं, चरमपरिणतिं प्राप्तिञ्च सार्थकतां लभन्ते । साहाय्यं भिन्नं देवाः अपि अन्यस्त्रीभूता भवितुं चेष्टन्ते । उन्नताः जनाः अपि मर्तस्य मानवीनां सङ्गं लब्ध्वा मिलिताः अभवन् । तस्मादेव उन्नताः मनुष्याः जायन्ते । अनेन उन्नतसम्प्रदायस्य पृथिब्यां विस्तृतिं सम्भाव्यते । मनुष्याः लभन्ते देवता तथा अन्यस्थानाधिना जनानां प्राप्नुवन्ति ।

दानिकेनमहोदयः स्पष्टम् अवदत् अद्यकारः मसृणचर्मावरणी प्राप्य प्राचीनकालविज्ञानं द्रष्टुं ज्ञातुं च मनुष्याः न शक्यन्ते । सूक्ष्मातिसूक्ष्मपर्यवेक्षणशक्त्या प्राचीनविज्ञानद्रष्टुं केवलं पन्था जायते । विज्ञानस्य अर्थम् - पदार्थविद्या, रसायणशास्त्रम्, गणितशास्त्रम्, जीवविद्या च । अद्यतनं विज्ञानमनस्कजनं विश्लेषणशक्त्या प्राचीनभारते विज्ञानोपलब्धिं कर्तुं सदा चेष्टन्ते विज्ञानम् । दानिकेन तथाकथितविज्ञानभावनां नानाभावेन द्रढीकर्तुम् चेष्टते स्म । तेन तस्य पुस्तके एकं गुरुत्वपूर्णं दृष्टान्तं स्थापयितुं "मेल्किजेद" स्य वर्णनाम् अकरोत् । एषा काहिनिः प्राचीनइहुदीग्रन्थात् संग्रहं कृता । दृष्टान्तं च "नीर" स्य वनिता "सोप्रानिमा" आसीत् वन्ध्या रमणी । दीर्घकालं यावत् सन्तानं न वीक्ष्य तस्य भर्ता तामेव तिरस्कारम् अकरोत् । अपमानेन सोप्रानिमा पञ्चत्वं प्राप्ता । तस्याः मृत्योः परम् अकस्मात् तस्याः गर्भादेव एकः सन्तानः जातः । अतः एकः महान् देवदूतः "मिखायेल:" नाम सर्गादेव अवतरणं कृत्वा नीरम् अवदत् - स एव इमं सन्तानं सोप्रानिमायाः गर्भे प्रतिस्थापनम् अकरोत् । ईदृशी घटना विज्ञानस्य अवदानं स्मारयति ।

**रामायणे विज्ञानं प्रयुक्तिश्च -**

महर्षिः वाल्मीकिविरचिते 'रामाय़णम्' महाकाव्ये विज्ञानस्य अजस्रम् अवदानानि परिलक्षितानि । रामाय़णमहाकाव्ये पुत्रेष्टियज्ञं दृष्टम् । अस्मिन् यज्ञे 'चरु' पानं कृत्वा दशरथस्य सहधर्मिण्यः अन्तःसत्वाः अभवन् । एतद् गर्भसञ्चारस्य भेषजमासीत् । यस्मादेव चरुपानं कृते सती रमण्यः अन्तःसत्वाः भवितुं शक्यते । एतद् भिन्नम् आदिकाव्ये रामायणे शव्दभेदी वाणस्य उल्लेखो भवति । युवा दशरथः एकदा मृगयां कर्तुं सरयू नद्यास्तीरे एकं वृक्षम् आरूढः । तस्य इच्छा जायते - यदि कश्चित् वन्यपशुः तस्यां नद्यां जलपानं कर्तुम् आगच्छति तमेव निधनं करिष्यति इति । गभीरे निशीथे कश्चिदपि न दृश्यते । सहसा नृपतिः दशरथः अशृणोत् कलकलवारिनिनादः चिन्तति कश्चिदेव पशुः वारि पानं कर्तुम् आगच्छति । तच्छव्दं लक्षीकृत्य सः वाणं निक्षिप्तवान् । तेन वानेन मृत्युः भवति अन्धमुनेः पुत्रस्य

। एषः शव्दभेदीवाणः अधुना गाइडेडमिसाइलस्य वार्ता स्मारयति ।

रामायणेऽपि ब्रह्मास्त्रं प्रयोगवार्ताम् अस्ति । समुद्रवन्धनं कृत्वा श्रीरामः यदा लङ्कागमनस्य उद्योगं कृतवान् तदा केनापि कारणेन समुद्रवन्धनं न सम्भ्याव्यते । रामचन्द्रः समुद्रम् आह्वयति स्म । समुद्रस्तु तं निकषा नागच्छत् । रामचन्द्रः ब्रह्मास्त्रं प्रयोगं कृत्वा समुद्रं वन्धनं कृतवान् । एष ब्रह्मात्रं आधुनिकविज्ञानसम्मतं भवति । अपि च रामायणे विमानस्य दृष्टान्तः परिलक्षते । एतद् विमानं विज्ञानसम्मतं भवति । आकाशयानम् उड्डीयमानं रथरूपेण स्वीक्रियति । विमानशव्दस्य अपि उल्लेखः दृश्यते । रथयानस्य श्रेणिविभागाः दृश्यन्ते । तथाकथितसमये षड् विधाः रथाः निर्मिताः अभवन् । एषां नामानि यथा - देवरथम्, पुष्परथम्, सांग्रामिकरथम्, पारियानिकरथम्, परपुराभियानिकरथम्, वैगयिकरथम् इत्यादयः । एषां नानाविधानि नामकरणानि कृतानि । एतान् विना यान्त्रिकदक्षतायाः श्रेणीविन्यासः अनेकशः दृश्यते । यथा - सुन्दरविमानम्, शकुनविमानम्, रुक्माविमानम्, इत्यादीनि । परवर्तीकाले पन्डिताः वर्णन्ति स्म, आदर्शरूपेण कीर्तन्ति स्म ।

संस्कृतसाहित्ये कथितम् - एते रथाः यदा उड्डीयमानाः भवन्ति, एतेभ्यः एव अग्निधूमश्च निर्गताः । रथाणां पक्षद्वयमासीत् । कस्य वा पक्षत्रयम्, पक्षचतुष्टयमासीत् । एते पक्षिवत् दूरतः एव दृश्यन्ते । एकः घूर्णायमाणं चक्रमासीत् । विमानमध्यात् कर्णविधायकः शव्दः अजायत् । दूरन्तवेगेन एते चलिताः । एषां मध्ये कश्चिदासीत् चतुर्भूजवत् कोऽपि वा आयताकारः, कोऽपि वा त्रिभूजाकृतिः विशिष्टाः अपश्यन् । विमानस्य चालकः “सौविका” इति प्रसिद्धा आसीत् । मातलिः एका दक्षः विमानचालकः आसीत् । मातलिः एतद्विषये सुविख्यातः वभूव ।

रामायणे लङ्केश्वररावणस्य विमानद्वयमासीत् । रावणः एकं विमानं लव्ध्वा जानकीदेवीं अपहरणं कृतवान् । हरणात् परं प्रत्यावर्तनकाले तेन सह जटायुपक्षिणः युद्धं भवति । तस्मिन् रणे विमानं ध्वंसीभूतं भवति । यदा रामचन्द्रः लङ्कापुरीस्थानात् सीतादेवीम् उद्धारं कृत्वा आगतवान् तदा विभीषणः तस्मै एकं रथं दत्तवान् ।तस्य नाम आसीत् पुष्पकविमानम् । एतद् विमानं विज्ञानसम्मतं भवति । तस्मिन् अनेकाः कक्षाः, वातायनाश्च दृश्यन्ते । रथस्यमध्ये आरामदायकः व्यावस्था आसीत् ।

रामायणस्य समये विज्ञानमतीव उन्नतावस्थायामासीत् । विज्ञानविषये कश्चित् प्रमाणं रामायणे इतस्ततविक्षिप्तभावेन दृश्यते । दशरथस्य शवररक्षा विषयम्, यन्त्रेण सहायतायां वृक्षोत्पाटनम्, शक्तिशेलेन आहतः मुमूर्षुः लक्ष्मणस्य चिकित्साविषय़म्, युद्धेव्यवहृतानि विविधानि अस्त्राणि प्रभृतीनां वर्णनायां ज्ञायते यत् - तस्मिन् युगे वैज्ञानिकवृद्धिः प्रयोगकौशलं च प्रभूतमग्रगतिमलभत ।

**महाभारते विज्ञानं प्रयुक्तिश्च -**

महाभारते विज्ञानस्य अजस्रम् अवदानं दृश्यन्ते । महाभारतस्य घटनाविश्लेषणे ज्ञायते विदुरस्य पुत्रः सन्जयः दृष्टिहीणधृतराष्ट्रस्य गृहं स्थित्वा कुरुक्षेत्ररणस्य युद्धविवरणीं श्रावयामास । एषा घटना वर्तमानकाले नेटओयार्क इत्यस्य सादृश्यं लभते । महाभारते दृश्यते जयद्रथवधकथा। जयद्रथं सूर्यास्तात् प्रागेव निधनं कर्तुम् असमर्थे सति अर्जुनः अग्णिप्रवेशं करिष्यति इति वार्ता । भगवान् श्रीकृष्णः मायया सूर्यदेम् आवृतम् अकरोत् ।तस्मिन् काले अर्जुनः जयद्रथवधं कृतवान् । एषा घटना कृष्णस्य अलौकिककीर्ति घोषयति । एष एव सूर्यग्रहणस्य आधुनिककालस्य दृष्टान्तविशेषः । केवलं श्रीकृष्णेण ज्ञायते इति सूर्यग्रहणस्य कारणेन आकाशं मेघावृतं भवति । कृष्णस्य इदं वैज्ञानिकयुक्तिः उपलव्धुं सक्षमता आसीत् ।

महाभारतेऽपि अनेकत्र विमानानाम् उल्लेखाः सन्ति । महाकवे एषः न कल्पना, वैज्ञानिकयुक्तिप्रसूत इव । एतद् विमानं सर्वत्रगामी अभवत् । महाकविः कालिदासः महाभारतात् काहिनीं संगृह्य विक्रमोर्वशीयमित्याख्ये नाटके दर्शयामास उर्वशीपुरुवयोः काहिनिः आकररूपेण संगृह्य नाटकं रचितवान् । दानवानां हस्तेभ्यः उर्वशीं रक्षित्वा पुरुवा गमनशीलविमाने चलितवान् । एतादृशी वर्णना तत्कालीनः वैज्ञानिकयानः विमानस्य व्यापकं वहुलं च व्यावहाराणि अपश्यन् ।

महाभारतेऽपि अर्जुनस्य वाणनिक्षेपस्य उल्लेखम् अस्ति । एषः वाणः आधुनिकः विज्ञानस्य परमानुअस्त्रेण सह सादृश्यम् अलभत । महाभारते वाणप्रयोगः वैज्ञानिकयुक्तिसम्पन्नं भवति ।

भागवतग्रन्थात् ज्ञायते श्रीकृष्णः नरकासुरं वधं कर्तुं द्वारका इति स्थानादेव प्रग्ज्योतिषपुरं गतवान् । नरकासुरोऽपि विमानम् आरुह्य तमेव आक्रमणं कृतवान् । नारकासुरः मृत्तिकास्थलात् चतुःसहस्रफुटं उच्चैः अवस्थानं कृतवान् । श्रीकृष्णः अस्त्रं निक्षिप्य तद्विमानं निम्नस्थानम् आनयत् । श्रीकृष्णस्य एतद् दिव्यास्त्रं विज्ञानसम्मतमासीत् । भागवतग्रन्थात् ज्ञायते -प्राचीनभारतेऽपि विज्ञानसम्पन्नं तथ्यं भृशं दृश्यते ।

**संस्कृतदर्शनशास्त्रे विज्ञानं प्रयुक्तिश्च -**

आनुमानिकः त्रिसहस्रवर्षात् प्रागेव भारतीयः ऋषिवरः कणाद् महोदयः विश्वजगतः गतिविधिं, जड़पदार्थस्य प्रकृतिं तस्य प्रज्ञया उपलव्धिं चकार । परवर्तिणीकाले डालटनमहोदयेण एतद् तत्त्वं प्रमाणं कृत्वा परमानुतत्त्वस्य आविष्कारकः वभूव । विश्वस्य वहवः विज्ञानीमहोदयाः उल्लिखितवन्तः परमानुचिन्तायाः जनकः कणादमहोदयः भवति ।

**चिकित्साशास्त्रेषु विज्ञानं प्रयुक्तिश्च -**

प्राचीने भारते चिकित्साविद्यायां शीर्षस्थानम् अलभत् । चिकित्साशास्त्रे सुश्रुतमहोदयः सुनामी आसीत् । स शतोर्धएकविंशतितमः शल्यचिकित्सायोग्यं छेदकानि व्यवहारं कृतवान् । विस्मयं ज्ञायते यत् - स शल्यचिकित्सां प्लास्टिकसार्जारीचिकित्सां च कृतवान् ।तस्मिन् समये अपराधिनां शास्तिरूपेण नासिकाछेदनं दृश्यते । अनेकानां प्लास्टिकसार्जारीचिकित्सायाः सहायतायाः पुनः नासिकाप्रतिस्थापनम् अकुर्वन् ।

भारतीयायुर्वेदशास्त्रेऽपि इतिहासे च चरकसंहिता नाम एकः एव गुरुत्वपूर्णं शास्त्रमासीत् । एतद् पृथिव्या आदिआयुर्वेदपुस्तकम् । आधुनिककालेऽपि एतद् पुस्तकं गुरुत्वपूर्णं विहितम् । ग्रन्थेऽपि रोगाणाम् उपशमानां च कथा वर्णते । एतद् विना प्राचीनगणितशास्त्रम् उन्नतमानरुपमासीत् ।

अस्माकं देशे विज्ञानविषयकभावना प्राचीनकालादेव प्रवर्तिता । रामायणम्, महाभारतम्, विक्रमोर्वशीयम् प्रभृतिषु विज्ञानस्य अजस्रं दृष्टान्तं दृश्यन्ते । प्राचीने भारतवर्षे विमानयानम्, ब्रह्मास्त्रयोगम्, वाणप्रयोगम्, दिव्यदिष्ट्या सर्वविधदर्शनम्, चरुपानम् - प्रभृतीनि ज्वलव्तदृष्टान्तानि परिकीर्तन्ते ।

प्राचीने भारते वर्तमानवत् विज्ञानस्य दृष्टान्तोल्लेखं दृश्यन्ते । संस्कृतकाव्येषु नाटकादिषु च वहूनि दृष्टान्तानि लक्ष्यन्ते । प्राचीनभारते विज्ञानस्य उदाहरणाणि पर्यालोचनया एतद् मन्यते, अद्यकारः विज्ञानस्य पथपरिक्रमा सुदूरातीतकालादेव परिलक्ष्यते । तस्मिन् काले एतादृशं रूपं नासीत् । कञ्चित् विषयं युगे युगे रूपपरिवर्तणं करोति । अतः मूलम् अस्वीकारं न कर्तव्यम् । विज्ञानप्रज्ञां युक्तिञ्च हातियारं कृत्वा व्याख्या सम्पादिता एव । अतः प्राचीनभारतीय़विज्ञानं प्रयुक्तिश्च अस्वीकारं कृते सति आधुनिकविज्ञानस्यकाले अहंवोधः

ISSN - 2250-1991 | IF : 5.215 | IC Value : 77.65

जायते । इत्यलं पल्लवितेन ।

**सहायकग्रन्थाः -**


१. संस्कृतसाहित्यसम्भारम्, ड.गौरीनाथः शास्त्री, नवपत्र प्रकाशन्, १९८० ।
२. संस्कृतसाहित्येतिहासः, धीरेन्द्रनाथः वन्द्योपाध्यायः, पश्चिमवङ्गः राज्यपुस्तकपर्षद्, २००० ।
३. संस्कृतसाहित्येतिहासः, ड. विजितः घोषः, ग्रन्थतीर्थः, २००८ ।
४. संस्कृतसाहित्येतिहासः, आचार्यः रामचन्द्रमिश्रः, चौखाम्बा विद्याभवन, वाराणसी, २०१३ ।
५. संस्कृतसाहित्येतिहासः, आचार्यः हंसराज अग्रवालः, चौखाम्वा सुरभारती प्रकाशन, वाराणसी, २०१२ ।
६. संस्कृतसाहित्येतिहासः, ड: देवकुमार दासः, श्रीवलराम प्रकाशनी, कलकाता, १४१२ वङ्गाब्द ।
७. संस्कृतशास्त्रमञ्जुषा, ड: उदय़शङ्करः झा. चौखाम्वा सुरभारती प्रकाशन, वाराणसी, २०१४ ।
८. कालिदासस्य रचनासमग्र, वसन्तः भट्टाचार्यः, सञ्चिता प्रकाशनी, कलकाता, २०१२ ।
९. संस्कृतसाहित्येतिहासः, युधिष्ठिरः गोपः, संस्कृतः वुकडिपो, कलकाता, २००७ ।
१०. संस्कृत साहित्येतिहास, आचार्य लोकमणि दाहालः, चौखाम्वा कृष्णदास अकादमी, वारानसी, २०११ ।
११. भारतीय़ इतिहास कोश, सच्चितानन्द भट्टाचार्या, उत्तर प्रदेश हिन्दी संस्थान, लखनऊ, २००४ ।
१२. वि.ए. संस्कृत निर्देशिका, वनविहारी घोषालः वुकस् अयाण्ड टेकनोलजिस , कलकाता, २०१२ ।
१३. संस्कृतसाहित्येतिहासः, श्री परेशचन्द्र भट्टाचार्यः, जयदुर्गा लाइव्रेरी, १९९५ ।
१४. संस्कृतसाहित्येतिहासः, जाह्नवीचरण भौमिकः, संस्कृतः वुकडिपो, कलकाता, २००६ ।
१५. संस्कृतसाहित्येतिहासः, ड. गौरीनाथ शास्त्री, सारस्वत लाइव्रेरी, १४१६ ।